


## पञ्चदशः पाठः


# माधवस्य प्रियम् अङ्गम्

माधवनामकः एकः बालकः आसीत्।
सः स्वप्ने स्वशरीरस्य अङ्गानि दृष्टवान्।
तानि परस्परं चर्चां कुर्वन्ति स्म।






पादः वदति – अहं श्रेष्ठः।
मम कारणेन माधवः चलति।



हस्तः अनुक्षणं वदति – अरे अरे! मम कारणेन माधवः लिखति, गृहकार्यं करोति, वस्तूनि आनयति च। अतः अहम् एव श्रेष्ठः।



मां विना माधवः किमपि द्रष्टुं शक्नोति किम्?
इति नयनं वदति।



कर्णः स्मितं कृत्वा कथयति – माधवः यदा मार्गे गच्छति तदा पृष्ठतः यानानां ध्वनिं यदि न शृणोति सावधानः च न भवति, तर्हि दुर्घटना भवेत्। माधवः मम कारणेन एव शिक्षकस्य उपदेशं श्रुत्वा ज्ञानं वर्धयति, सङ्गीतं श्रुत्वा आनन्दं च अनुभवति।

© NCERT not to be republished

झटिति मुखं सूचयति – 'भोः! सर्वे शृण्वन्तु,
माधवः मम कारणेन भोजनं करोति,
भाषणं करोति, शिक्षकस्य प्रश्नस्य उत्तरं वदति।
मम साहाय्येन उदरमपि भोजनं प्राप्नोति।
भवन्तः सर्वे सबलाः भवन्ति। अतः अहम् एव श्रेष्ठः'।





उदरं सूचयति 'भवतु, भवतु, कोलाहलं न कुर्वन्तु। वयं सर्वे माधवम् एव पृच्छाम, कः श्रेष्ठः' इति।

माधवः विचारयति बोधयति च –
'मम शरीरस्य सर्वाणि अङ्गानि मम कृते उपकारकाणि सन्ति। अहं नयनाभ्यां पश्यामि, कर्णाभ्यां शृणोमि, मुखेन भाषणं करोमि भोजनं करोमि च, उदरेण पाचनात् शक्तिं प्राप्नोमि पादाभ्यां च चलामि। अतः भवन्तः सर्वेऽपि श्रेष्ठाः।
भवन्तः सर्वेऽपि मम प्रियाः'।



© NCERT not to be republished



Reprint 2025-26

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| स्वप्ने | स्वप्नसमये | स्वप्न में | In Dream | |
| स्वशरीरस्य | निजकायस्य | अपने शरीर के | Of his own body | |
| अङ्गानि | अवयवाः | अङ्ग | Body parts | |
| दृष्टवान् | अपश्यत् | देखा | Saw | |
| चर्चाम् | आलापम् | चर्चा को | Discussion | |
| श्रेष्ठः | उत्तमः | श्रेष्ठ | Great | |
| अनुक्षणम् | सत्वरम् | उसी समय | Instantly | |
| गृहकार्यम् | गृहे पठनकर्म | गृहकार्य | Homework | |
| मां विना | मां विहाय | मेरे बिना | Without me | |
| स्मितम् | मन्दहासः | थोड़ा हँस के | Smile | |
| शक्नोति | समर्थः भवति | समर्थ होता है | Able to | |
| मार्गे | वर्त्मनि | मार्ग में | On road | |
| सङ्गीतम् | सुन्दरं गीतम् | सङ्गीत | Music | |
| साहाय्येन | सहायकारणेन | सहायता से | With the help of | |
| प्राप्नोति | प्राप्तं करोति | प्राप्त करता है | Gets | |
| सबलाः | बलवन्तः | बलवान् | Strong | |
| भवेत् | स्यात् | हो सकता/ सकती है | May happen | |
| कोलाहलम् | आरवः | शोर | Quarrel | |
| विचारयति | चिन्तयति | विचार करता है | Thinks | |
| बोधयति | ज्ञापयति | समझाता है | Advises | |
| उपकारकाणि | सहायकानि | सहायता करने वाले | Helpful | |
| शक्तिम् | सामर्थ्यम् | ताकत | Strength | |

© NCERT not to be republished



Reprint 2025-26

## वयम् अभ्यासं कुर्मः


१. **चित्रं दृष्ट्वा अङ्गस्य नाम लिखन्तु—**

(क)  – ..........................

(ख)  – ..........................

(ग)  – ..........................

(घ)  – ..........................

(ङ)  – ..........................

२. **कोष्ठकात् समुचितं क्रियापदं चित्वा उदाहरणानुसारम् अङ्गस्य कार्यं लिखन्तु—**

**यथा** – नयनं – ......पश्यति......

(क) मुखम् – .......................... (चलति, हसति, वदति)

(ख) पादः – .......................... (लिखति, चलति, पश्यति)

(ग) कर्णः – .......................... (हसति, वदति, शृणोति)

(घ) नासिका – .......................... (आघ्राणं करोति, नृत्यति, धावति)

(ङ) जिह्वा – .......................... (धावनं करोति, आस्वादनं करोति, पश्यति)

३. **कोष्ठकात् समुचितां संख्यां चित्वा रिक्तस्थानं पूरयन्तु—**

(क) मम .......................... शिरः अस्ति। (एकम्, अनेकं, चत्वारि)

(ख) मम .......................... पादौ स्तः। (त्रयः, द्वौ, पञ्च)

(ग) मम .......................... केशाः सन्ति। (दश, अष्ट, बहवः)

(घ) मम .......................... दन्ताः सन्ति। (चत्वारः, अष्टाविंशतिः, द्वात्रिंशत्)

(ङ) मम हस्तयोः .......................... अङ्गुल्यः सन्ति। (अष्ट, दश, पञ्चदश)

© NCERT not to be republished



Reprint 2025-26

**४. कोष्ठकात् समुचितं क्रियापदं चित्वा उदाहरणानुसारं शरीराङ्गस्य नाम लिखन्तु—**

यथा – पश्यति – ........नयनम्........

(क) शृणोति – ........................ (गुल्फः, चिबुकम्, कर्णः)

(ख) धावति – ........................ (पादद्वयम्, हस्तद्वयम्, नयनद्वयम्)

(ग) नमति – ........................ (शिरः, कूर्परः, जङ्घा)

(घ) सूचयति – ........................ (अङ्गुली, नखः, चरणः)

(ङ) लिखति – ........................ (हस्तः, मणिबन्धः, कटिः)

**५. पट्टिकातः शब्दान् चित्वा यथायोग्यं गणेषु लिखन्तु—**

नासिका मणिबन्धः चिबुकम् कूर्परः हस्तः मणिबन्धः कपोलः,
भुजः ललाटम् स्कन्धः जङ्घा नयनम् जानु ऊरुः







| | | |
|---|---|---|
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |

© NCERT not to be republished



Reprint 2025-26

६. **कोष्ठकात् समुचितं पदं चित्वा वाक्यानि रचयन्तु—**

(क) अहं ........................ गायनं करोमि। (पादेन , नासिकया , मुखेन)

(ख) अहं ........................ धावनं करोमि। (पादाभ्यां , ललाटेन , कूर्परेण)

(ग) अहं ........................ आघ्राणं करोमि। (नखैः , नासिकया , चरणेन)

(घ) अहं ........................ श्रवणं करोमि। (कर्णाभ्याम् , नासिकया , अङ्गुष्ठैः)

(ङ) अहं ........................ भोजनं करोमि। (मुखेन , पादेन , नासिकया )

७. **पट्टिकातः समुचितं शरीराङ्गं चित्वा भगिनी कुत्र किं धरति इति सूचयन्तु—**

कण्ठे ललाटे नयनयोः ओष्ठयोः पादयोः ,
कर्णयोः हस्तयोः वामहस्ते अङ्गुल्यां नेत्रयोः

भगिनी .................... पादुकाद्वयं धरति।

भगिनी .................... कङ्कणानि धरति।

भगिनी .................... मुद्रिकां धरति।

भगिनी .................... घटीयन्त्रं धरति।

भगिनी .................... मालां धरति।

भगिनी .................... कुण्डलद्वयं धरति।

भगिनी .................... उपनेत्रं धरति।

भगिनी .................... कुङ्कुमं धरति।

भगिनी .................... ओष्ठरागं धरति।

भगिनी .................... कज्जलं धरति।

८. **वाक्यं शुद्धम् अशुद्धं वा इति सूचयन्तु—**

(क) अहं कर्णाभ्यां भोजनं करोमि। (शुद्धम्/अशुद्धम्)

(ख) अहं नासिकाद्वारा श्वासं स्वीकरोमि। (शुद्धम्/अशुद्धम्)

(ग) अहम् अङ्गुष्ठैः गणनां करोमि। (शुद्धम्/अशुद्धम्)

(घ) अहं नयनाभ्यां श्रवणं करोमि। (शुद्धम्/अशुद्धम्)

(ङ) अहं हस्तेन कार्यं करोमि। (शुद्धम् / अशुद्धम्)


© NCERT not to be republished



Reprint 2025-26

## योग्यताविस्तरः

### शरीराङ्गानां नामानि






Reprint 2025-26

## मधुराष्टकं पठन्तु स्मरन्तु च



### मधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम्॥१॥
वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम्।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम्॥२॥
वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम्॥३॥
गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम्॥४॥
करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम्।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम्॥५॥
गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम्॥६॥
गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम्।
दृष्टं मधुरं सृष्टं मधुरं मधुराधिपतेरखिलं मधुरम्॥७॥
गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम्॥८॥

*श्रीवल्लभाचार्य-कृतं मधुराष्टकम्*



© NCERT not to be republished



### गतिविधि-कार्यम्

**कक्षायां सर्वे छात्राः शिक्षकस्य मार्गदर्शनेन अस्य पाठस्य नाट्याभिनयं कुर्वन्तु।**



### परियोजनाकार्यम्

**योग्यताविस्तरभागे विद्यमानं चित्रं स्फोरकपत्रे रचयित्वा अङ्गानां नामानि लिखन्तु।**